अपामार्जनस्तोत्र

नं० १२८५

5745

4

226

नं० ~~२८४~~

अ पा मा र्जं न स्तो त्रे

जै प० ४

सं. १२ ७५४ क
अपामार्जि
स्तोत्र
१ प कागी
स्तोत्र
(कौ) ग्रीक

ॐ श्री विघ्नहर्त्रे नमः दाल्भ्य उवाच अनाराधितगो
विंदा ये नराः दुःखभागिनः तेषां दुःखाभिभूतानां य
त्कर्तव्यं दयालुभिः पश्यद्भिः सर्वभूतस्थं वासुदेवं म
हामुने समदृष्टिभिरीशेशं तन्ममब्रूह्यशेषतः पुल
स्त्य उवाच सौवर्णं राजतं ताम्रं मृण्मयं वा नवं दृढं
अव्रणं कलशं शुद्धं स्थापयेन्मण्डलोपरि तत्रोदकं स
मानीय शुद्धं निर्मलमेव च पंचशांतकुशाग्राणि स्था
पयेत्कलशोपरि गृहीत्वा तु समूलाग्रान्कुशान्शुद्धो
श्च रोगिणः मार्जयेत्सर्वगात्राणि कुशाग्रैः दाल्भ्य शां
तिकृत् रोगग्रहविषार्तानां कुर्याच्छांतिमिमां शुभां
विष्णुभक्तो विशेषेण शुचिस्तद्गतमानसः वाराहं ना
रसिंहं च वामनं विष्णुमेव च ध्यात्वा समाहितो भूत्वा
दिव्यनामानि विन्यसेत् पूर्वे नारायणः पातु वारि
जाक्षस्तु दक्षिणे प्रद्युम्नः पश्चिमे पातु वासुदेवस्त
थोत्तरे ऐशान्यां रक्षको विष्णुराग्नेय्यां तु जनार्दनः नै
ऋत्यां पद्मनाभस्तु वायव्यां मधुसूदनः ऊर्ध्वं गोवर्ध
नो देवो धरायां च त्रिविक्रमः एताभ्यो दशदिग्भ्यस्तु
सर्वतः पातु केशवः अंगुष्ठाग्रे तु गोविंदं तर्जन्यां तु
महीधरं मध्यमायां हृषीकेशमनामायां त्रिविक्रमं
कनिष्ठायां न्यसेद्विष्णुं करमध्ये तु माधवं शिखायां
केशवं न्यस्य मूर्ध्नि नारायणं न्यसेत् माधवं तु लला
टे तु गोविंदं तु भ्रुवोः स्थितं चक्षुर्मध्ये न्यसेद्विष्णुं श्र
वणे मधुसूदनं त्रिविक्रमं कपोले तु वामनं कर्णमू
लयोः दामोदरं दंतपंक्तौ वाराहं चिबुके तथा जिह्वा
ग्रां वासुदेवं तु विद्याद्गरुडध्वजं हृषीकेशमुरो

ष्ठेपद्मनाभंतथापरे वैकुंठंकंठमध्येतुनाभा
वनंतमथ्यथ दक्षिणेतुभुजेविप्रविन्यसेत्पुरुषो
त्तमं वामेतुयोगिनंन्यस्यराघवंहृदिविन्यसेत्
पीतवाससमाऽऽकायेहृदिनाभ्यांतुविन्यसेत्
करेतुदक्षिणेविप्रततःसंकर्षणंन्यसेत् वामे
विष्णुहरिंविद्यात्कटिमध्येजनार्दनं पृष्ठेत्तितिय
रंविद्यादच्युतंस्कंधमूलयोः वक्षःस्थलेमाधवं
तुकक्षयोर्योगशायिनम् स्वयंभुवंमेढ्रमध्येउ
र्वोश्चैवगदाधरम् चक्रायुधंजानुमध्ये जंघयो
रच्युतंतथा गुल्फयोर्नारसिंहंतुपादपृष्ठेमितो
जसं अंगुल्यांश्रीधरंन्यस्यपंकजाक्षंतुसंधिषु
रोमकूपेगुडाकेशंशक्रक्षरक्तास्थिमज्जसुनविष्णु
माधवंचैवन्यसेत्पादतलेच्युतंमनोबुध्यौरहंका
रेचित्तेन्यसेज्जनार्दनं एवंन्यासविधिंकृत्वासाक्षा
न्नारायणोभवेत् तनुर्विष्णुमयीतस्यपापंवकिंचिन्न
भोष्यते एवंन्यासविधिंकृत्वायत्कार्यंशृणुतद्द्विज
वैष्णवेनतुकर्मैतत्सर्वसिद्धिःप्रदायकं पूजाका
लेतुदेवस्यस्नानकालेतथैवच होमारंभेचकर्मे
ष्वत्रिसंध्यासुचनित्यशः अभयंसर्वभूतेभ्योविष्णु
लोकंसगच्छति विष्णुलोकंसगच्छेत्योंनमः ॐनमः
परमार्थायेत्यस्यप्रामार्जनमंत्रस्यपुलस्त्यऋषिः
श्रीनृसिंहोदेवताहरामुकस्येतिबीजं अच्युतानं
तगोविंदेतिशक्तिः नमःहाटककेशांतेतिकील
कम् ममसमस्ताभिलषितार्थेपाठेविनियोगः ॐन
मःपुरुषार्थायपुरुषायमहात्मने अरूपवहुरू

पायव्यापिनेपरमात्मनेनिष्कल्मषायशुद्धायध्या
नयोगरतायच नमस्कृत्वाप्रवक्ष्यामियन्नत्सिध्यत
मेवचः वाराहंनारसिंहंत्वावामनंविष्णुमेवच न
मस्कृत्वाप्रवक्ष्यामियन्नत्सिध्यत्वमेवचः त्रिविक्र
मायरामायवैकुण्ठायनरायच नमस्कृत्वाप्रवक्ष्या
मियन्नत्सिध्यतुमेवचः वाराहनारसिंहेशवामने
शत्रिविक्रम हयग्रीवेशसर्वेशहृषीकेशहराशु
भ अपराजितचक्राद्यैश्चतुर्भिःपरमायुधैःअखं
डितानुभावैस्त्वंसर्वदुःखहरोभव हरामुकस्यदुरि
तंत्वंकृतंत्वंकृत्याध्यापितं मृत्युर्वैध्यान्तिभयंदुरिष्टस्य
चयफलपरायध्यानसंहितःप्रयुक्तंचाभिचा
रकंगरस्पर्शमहारोगप्रयोगंजरयाजनहरये
वासुदेवायनमः कृष्णायखड्गिने नमःपुष्करने
त्रायकेशवायादिचक्रिणे नमःकमलकिंजल्क
पीतनिर्मलवाससे महाहवरिपुस्कन्धघृष्टचक्रा
यचक्रिणेदंष्ट्रोद्धृतक्षितिधृतेत्रयीमूर्तिनेनमोनमः
महायज्ञवराहायशेषभोगानुशायिने तप्तहाट
ककेशान्तज्वलत्पावकलोचनवज्राधिकनख
स्पर्शदिव्यसिंहनमोस्तुते काश्यपायादिकृष्णाय
ऋग्यजुःसामरूपिणेतुभ्यंवामनरूपायक्रमते
गांनमोनमः वराहाशेषदुष्टानिसर्वपापफला
निवै मर्दमर्दमहादंष्ट्रमर्दमर्दचयत्फलं नर
सिंहकरालास्यदंतप्रान्तानलोज्ज्वलभंजभंज
निनादेनदुष्टान्यस्यार्तिनाशनः ऋग्यजुःसाम
गर्भाभिर्वाग्भिर्वामनरूपधृक्प्रशमंसर्वदुः

खानिनयत्वस्यजनार्दनः ऐकाहिकंद्व्याणा
हिकंचतथात्रिदिवसज्वरंचातुर्थिकंतथात्यु
ग्रंतथैवसततंज्वरंदोषोत्थं सन्निपातोत्थंत
थैवागंतुकज्वरंशमंनयत्याशुगोविंदछिंधिभिं
ध्यस्यवेदनांनेत्रदुःखंशिरोदुःखंदुःखंचोदरसं
भवं अनुच्छ्वासमतिश्वासंपरितापंसवेपथुंगु
दघ्राणाक्षिरोगांश्चऊष्टरोगंतथात्ययंस्त्रियादी
न्खेज्ञारोगान्त्वगास्थ्यंतर्बहिःस्थितान्कामला
दींस्तथारोगान् प्रमेहांश्चातिदारुणान्भगंद
रातिसारांश्चमुखरोगंसवल्गुली अश्मरीमूत्र
कृच्छ्रांश्चरोगानन्यांश्चदारुणान्येवातप्रभवा
रोगायेचपित्तसमुद्भवाःकफोद्भवाश्चयेरोगाये
चान्येसान्निपातिकाः आगंतुकाश्चयेरोगालूता
विस्फोटकादयःतेसर्वेप्रशमंयांतुवासुदेवाप
मार्जिताः विलयंयांतुतेसर्वेविलोकोच्चारणेनतु
क्षयंगच्छंतुचाशेषास्तेचक्राभिहताहरेः अच्यु
तानंतगोविंदनामोच्चारणभीषिताः नश्यंति
सकलारोगाःसत्यंसत्यंवदाम्यहं सत्यंसत्यं
पुनःसत्यमुद्धृत्यभुजमुच्यते वेदशास्त्रात्परं
नास्तिनदेवंकेशवात्परंस्थावरंजंगमंवापिकृ
त्रिमंचापियद्विषंदंतोद्भवंनखोद्भू तमाकाश
प्रभवंविषंलूतादिप्रभवंयच्चविषमत्यंतदुःख
दंशमंनयतुतत्सर्वंकीर्तितोस्यजनार्दनःग्रह
प्रेतग्रहाश्चैवतथावैडाकिनीग्रहान् वेताला

श्चपिशाचांश्चगंधर्वायक्षराक्षसान् शाकुनीपू
२ तनायांश्चतथावैनायकग्रहान् मुखमंड
निकांक्रूरांरेवतीं वृद्धरेवतीं वृद्धिकाख्यान्ग्रहां
3 श्चोग्रांस्तथामातृग्रहानपिवालस्यविलोश्चरित
हंतुवालग्रहानिमान् वृद्धानांयेग्रहाः केचिद्ये
चवालग्रहाः क्वचित् नरसिंहस्यतेदृष्ट्वादग्धा
येचापियौवनेदंष्ट्राकरालवदनोनरसिंहोमहा
रवः ग्रहानशेषान्निःशेषान्करोतिजगतोहितः
नरसिंहमहासिंहज्वालामालोज्ज्वलानन ग्रहा
नशेषान्सर्वेशखादखादाग्निलोचन येरोगायेम
होत्पातायद्विषंयेमहाग्रहाः यांतिचक्रूरकर्माणोग्र
हपीडाश्चदारुणाः शस्त्रक्षतेषुयेदोषाज्वालागा
र्दभिकादयः तानिसर्वाणिसर्वात्मन्परमात्मज
नार्दन किंचिद्रूंसमास्थायवासुदेवास्तुनाशय
क्षिप्रंवासुदर्शनचक्रज्वालामालातिभीषण स
र्वदुष्टप्रशमनंकुरुदेववराच्युत सुदर्शनमहा
ज्वालछिंधिछिंधिचमारयसर्वदुष्टानिरक्षांसि
क्षपयारिविभीषण प्राच्यांप्रतीच्यांदिशिचदक्षि
णोत्तरतस्तथा रक्षांकरोतुसर्वात्मानरसिंहः स्व
गर्जितैः भूमंतरिक्षेचतथापार्श्वतः पृष्ठतोग्रतः
रक्षांकरोतुभगवान्वहुरूपीजनार्दनः यथाविश्व
जगत्सर्वंसदेवासुरमानुषम् तेनसत्येनसकलंदु
ष्टमस्यप्रशाम्यतु यथाविष्णोस्मृतेसद्यः संक्षयं
यांतिपातकं तेनसत्येनसकलंदु — मस्यप्रशा

म्पत्र परमात्मा यथा विष्णुर्वेदांतेष्वपिगीयते
तेनसत्येनसकलंयन्मयोक्तंतथास्तुतत् शांति
रस्तुशिवंचास्तुप्रणश्यत्वशुभंचयत् वासुदेवश
रीरोत्थैःकुशैःसंमार्जितोमया अपामार्जितगोविंदो
नरोनारायणःप्रभुः ममास्तुसर्वदुःखानांप्रशमोव
चनाद्धरेः शांताःसमस्तरोगास्तेग्रहाःसर्वेविषाणि
च भूतानिप्रशमंयांतुसंस्मृतेमधुसूदने एतत्स
मस्तरोगेषुभूतग्रहभयेषुच अपामार्जनकंशस्त्रं
विष्णुनामाभिपूजितं सर्वबाधापनुत्यर्थंपुल
स्त्याभिहितंपुरा यथाचक्रायुधंविष्णोर्यथाशूलंह
रस्यतु यथावज्रंसुरेंद्रस्यतथाविप्रकरेकुशा एते
कुशाविष्णुशरीरसंभवाजनार्दनोहंस्वयमेवचा
गतः हतंमयादुष्टमशेषजंतोःस्वस्थोभवत्वेष
यथावचोहरेः शांतिरस्तुशिवंचास्तुदुष्टमस्यप्र
शाम्यतु यदस्यदुरितंकिंचित्तत्क्षिप्तंलवणार्ण
वेस्वास्थ्यमस्यसदैवास्तुहृषीकेशस्यकीर्तनात्
यतएवागतंपापंतत्रैवप्रतिगच्छतु एतद्रोगादिपी
डासुजंतूनांहितमीरितं विष्णुभक्तेनकर्तव्यमपा
मार्जनकंपरं अनेनसर्वदुःखानिअपामार्जनकंप
रं अनेनसर्वदुःखानिप्रशमंयांत्यशेषतः सर्वभू
तहितार्थायकुर्यात्तस्मात्सदैवहि सर्वापराध
शमनंसर्वबाधाविनाशनं सर्वदोषहरंपुण्य
मपामार्जनकंपरं यस्तुभक्त्यापठेन्नित्यंसर्व

४ पापैः प्रमुच्यते तस्य तुष्यति गोविंदो मनसा चिं
तितं लभेत् कोटिजन्मकृतं पापं पठनादेव नश्य
5 ति गोसहस्रस्य दत्तस्य फलमेतदवाप्नुयात् य इदं
धीये हि द्वान् श्रद्धाभक्तिसमन्वितः ग्रहास्तेनोप
जिघ्रन्ति नरोगान च राक्षसाः यन्योयश्चास्य शत्रुघ्नः
स्तवोयं मुनिसत्तम पठतां सृष्टिजं चैव ददाति पर
मां गतिम् इत्यपामार्जनस्तोत्रं समाप्तम् ॥



